# Vishnuproktam Shivarchanopadesham 5

# વિષ્ણુપ્રોક્તં શિવાર્ચનોપદેશમ્ ૫

## Document Information

Text title : Vishnuproktam Shivarchanopadesham 5

File name : viShNuproktaMshivArchanopadesham5.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 26 kumbhaghoNamahimAnuvarNanam | 386-397||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2024

*sanskritdocuments.org*

# Vishnuproktam Shivarchanopadesham 5

# વિષ્ણુપ્રોક્તં શિવાર્ચનોપદેશમ્ ૫

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)
વિષ્ણુઃ (ઉવાચ)
વિશ્વં ચ ભુવનં ચિત્તે ત-
જ્જાતં ભૂયો જાયમાનં ચ ભૂયઃ ।
એતત્સર્વં રુદ્ર એવેતિ મત્વા
ભૂયો ભૂયઃ પૂજ્યમાનો (પૂજનીયો) મહેશઃ ॥ ૩૮૬॥

સર્વં રુદ્રં મત્વા સર્વભાવેન સર્વં
સર્વાશાસ્યં નિર્ગુણં નિષ્કલં ચ ।
સસેવન્તે સાધવઃ સર્વથા નો
ભૂયો ભૂયઃ પૂજનીયો મહેશઃ ॥ ૩૮૭॥

રુદ્રઃ સર્વં રુદ્ર એકત્વમાહુઃ
એકો રુદ્રો ન દ્વિતીયાય તસ્થે ।
નેશાદન્યત્કિઞ્ચિદસ્તીતિ નિત્યં
ભૂયો ભૂયઃ પૂજનીયો મહેશઃ ॥ ૩૮૮॥

યં વેદાન્તા નૈવ જાનન્તિ સિધ્દા
યં યોગીન્દ્રા નૈવ જાનન્તિ વિપ્રાઃ ।
તં ચિદ્રૂપં જ્ઞાતુમિચ્છત્યતો વા
યો યં જ્ઞાત્વૈવામૃતત્વં પ્રયાતિ ॥ ૩૮૯॥

યો નિર્લિપ્તો નિર્ગુણોઽપિ ત્રિણેત્રો
યો નિર્બાહુઃ સ્વર્ણબાહુઃ સ્વતન્ત્રઃ ।
યો નીરૂપઃ સ્વર્ણરૂપઃ સ એવ
ભૂયો ભૂયઃ પૂજનીયો મહેશઃ ॥ ૩૯૦॥

નિર્ગુણોઽપિ સ્વર્ણવર્ણો ય આસી-
દ્યોવાઽરૂપોઽપ્યમ્બિકાનાથ આસીત્ ।

દેવાધીશઃ સોઽયમજ્ઞેયતત્વો
ભૂયો ભૂયઃ પૂજનીયો મહેશઃ ॥ ૩૯૧॥

યસ્યેચ્છાતોઽસ્માકમુત્પત્તિરાસો-
દ્યસ્યેચ્છાતો જાયતે રક્ષણં ચ ।
યસ્યેચ્છાતો ભાવિનાશઃ સ નિત્યો
ભૂયો ભૂયઃ પૂજનીયો મહેશઃ ॥ ૩૯૨॥

યસ્માદ્ભીતો વાતિ વાયુઃ સદાયં
યસ્માદ્ભીતો(ત્યો)દેતિ સૂર્યોઽપિ નિત્યમ્ ।
યસ્માદ્ભીતો (વહ્નિમુખ્યા) વીતિહોત્રેન્દ્રમુખ્યા
ભૂયો ભૂયઃ પૂજનીયો મહેશઃ ॥ ૩૯૩॥

યસ્યાર્ચાતો લભ્યતે સર્વપૃથ્વી
યસ્યાર્ચાતો લભ્યતે મોક્ષલક્ષ્મીઃ ।
યસ્યાર્ચાતોઽનેકધર્માદ્યસિદ્ધિઃ
સોઽયં શમ્ભુઃ પૂજનીયોઽનિશં ચ ॥ ૩૯૪॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે વિષ્ણુપ્રોક્તં શિવાર્ચનોપદેશં ૫ સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૬ કુમ્ભઘોણમહિમાનુવર્ણનમ્ । ૩૮૬-૩૯૭॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 26 kumbhaghoNamahimAnuvarNa
. 386-397..

Notes:
Viṣṇu વિષ્ણુ delivers Upadeśa ઉપદેશ (to Deva-s દેવાઃ) about the OmniPresence of Rudra રુદ્ર in this Universe and worshiping Maheśa-Śambhu-Śiva મહેશ-શમ્ભુ-શિવ.

Proofread by Ruma Dewan

*Vishnuproktam Shivarchanopadesham 5*

pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*